गुद्र, इ क अनृते । इति कविकल्पद्रुम: ॥ (चुरां-परं-सकं-सेट्-इदित् ।) पञ्चमस्वरी । दन्त्यवर्ग-तृतीयोपध: । अनृतो मिथ्योक्ति: । इ क, गुन्द्र-यति नीच: मिथ्या वदतीत्यर्थ: । गुन्द्र इत्यने-नैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थ: । इति दुर्गादास: ॥

गुध, ग रुषि । इति कविकल्पद्रुम: ॥ (क्र्यां-परं-अकं-सेट् ।) ग, गुध्नाति । जुगोध । इति दुर्गा-दास: ॥

गुध, ङ क्रीडे । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-अकं-सेट् ।) ङ, गोधते । इति दुर्गादास: ॥

गुध, य वेष्टे । इति कविकल्पद्रुम: ॥ (दिवां-परं-सकं-सेट् ।) य, गुध्यति । जुगोध । इति दुर्गा-दास: ॥

गुधेर:, त्रि, (गुध्यति सर्व्वतो वेष्टयति वेष्टनेन रक्ष-तीत्यर्थ: इति । गुधय वेष्टने "मूलेरादय: ।" उणां । १ । ६१ । इति एरक् ।) रक्षक: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

गुन्दल:, पुं, (गुमिति मधुरमस्फुटशब्दं कारयन् दल्यते मर्द्दातेऽसौ । दल् + णिच् + कर्म्मणि अच् ।) मर्द्दलशब्द: । इति हेमचन्द्र: । ६ । ४४ ॥

गुन्द्र:, पुं, (गुद्रि + अच् ।) शरतृणम् । इत्यमर: । २ । ४ । १६२ ॥ तृणविशेष: । गोदपटेर इति देशान्तरीयभाषा । तत्पर्य्याय: । पटरक: २ अप्सु: ३ शृङ्गवेराभमूलक: ४ । अस्य गुणा: । कषायत्वम् । मधुरत्वम् । हिमत्वम् । पित्तरक्त-मूत्रकृच्छ्रनाशित्वम् । स्तन्यशुक्ररजोमूत्रशोधन-त्वञ्च । इति भावप्रकाश: ॥

("गुन्द्रान् दग्ध्वा कृतं भस्म हरितालं मन:शिला ।
उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥"
इति सुश्रुते चिकित्सितस्थाने १९ अध्याये ॥)

गुन्द्रमूला, स्त्री, (गुन्द्रस्य मूलमिव मूलमस्य ।) एरकातृणम् । इति भावप्रकाश: ॥

गुन्द्रा, स्त्री, (गुन्द्र + टाप् ।) भद्रमुस्तक: । प्रियङ्गु-वृक्ष: । इत्यमर: । २ । ४ । १६० ॥ गवेधुका । इति रत्नमाला ॥ एरका । इति भावप्रकाश: ॥

("वेल्लन्तरारणिकबूकवृषाश्मभेद-
गोकण्ठकेत्कटसहाचरवाणकाशा: ।
वृक्षादनीनलकुशद्वयगुण्ठगुन्द्रा
भल्लूकमोरटकुरण्टकरम्भपार्था: ॥"
इति वाभटे सूत्रस्थाने १५ अध्याये ॥

पित्तसंशमनीयवर्गान्तर्गतौषधिविशेष: । यथा । "चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठा पयस्या-विदारीशतावरीगुन्द्राशैवालकह्लारकुमुदोत्पल-कदलीकन्दलीदूर्व्वामूर्व्वाप्रभृतीनि काकोल्यादि-र्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्त-संशमनो वर्ग: ॥" इति सुश्रुते सूत्रस्थाने ३९ अध्याये ॥)

(गङ्गा । यथा काशीखण्डे । २९ । ५४ ।
"ग्रहपीड़ाहरा गुन्द्रा गरघ्नी गानवत्सला ॥")

गुन्द्राल:, पुं, (गुन्द्रं नीड़निर्म्माणार्थं तृणादिकं आलाति आदत्ते इति । आ + ला + क: ।) जीवञ्जीवपक्षी । इति हेमचन्द्र: । ४ । ४०६ ॥ गुन्दालोऽपि पाठ: ॥

गुन्फ, श ग्रन्थे । इति कविकल्पद्रुम: ॥ (तुदां परं-सकं-सेट् ।) पञ्चमस्वरी । श, गुम्फति मालां मालिक: । जुगुम्फ । इति दुर्गादास: ॥

गुप, ऊ रक्षे । इति कविकल्पद्रुम: । (भ्वां-परं-सकं-वेट् ।) आयन्तत्वादुभयपदमिति वोपदेव: । गोपायति गोपायते । अरे तु आयस्याप्राप्ति-पक्षे परस्मैपदमेव । अगोपीत् । जुगोप गोरूप-धरामिवोर्व्वीमिति रघु: ॥ ऊ, गोपिष्यति गोप्स्यति । इति दुर्गादास: ॥

गुप, क भासि । इति कविकल्पद्रुम: ॥ (चुरां-परं-अकं-सेट् ।) क, गोपयति । भासि दीप्तौ । इति दुर्गादास: ॥

गुप, ङ गोपनकुत्सयो: । इति कविकल्पद्रुम: ॥ (भ्वां आत्मं-सकं-सेट् ।) गोपनमपह्नव: । ङ, कङ्कणभञ्जनत्कारञ्च किं गोपसे । अत्र त्वादयो न स्युरिति रमानाथ: । कुत्सा । निन्दा । सा जुगुप्सां प्रचक्रेऽस्तन् । इति भट्टि: । इति दुर्गा-दास: ॥

गुप, य इर् व्याकुलत्वे । इति कविकल्पद्रुम: ॥ (दिवां-परं-अकं सकञ्च-सेट् ।) व्याकुलत्वं व्याकुलीभावस्तत्करणञ्च । य, धीरो न गुप्यति महत्यपि कार्य्यजाते । इति हलायुध: । गुप्यति गा वृष्टि: । आकुलीकरोतीत्यर्थ: । इति चतु-र्भुज: । इर्, अगुपत् अगोपीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादास: ॥

गुपिल:, पुं, (गोपायति प्रजाजनानिति । गुप् रक्षणे + "गुपादिभ्य: कित् ।" उणां । १ । ५६ । इति इलच् किच्च ।) राजा । इत्युणादिकोष: ॥

गुप्तं, त्रि, (गुप्यते स्म । गुप् + कर्म्मणि क्त: ।) कृतरक्षणम् । तत्पर्य्याय: । त्रातम् २ त्राणम् ३ रक्षितम् ४ अवितम् ५ गोपायितम् ६ । (यथा, महाभारते । १ । १ । १८८ ।
"यदाश्रौषं व्यूहमभेद्यमन्यै-
र्भारद्वाजेनात्तशस्त्रेण गुप्तम् ॥")
कृतगोपनम् । तत्पर्य्याय: । गूढ़म् २ । इत्यमर: । ३ । १ । १०६ । (यथाह वशिष्ठ: ।
"आहारनिर्हारविहारयोगा:
सुसंवृता धर्म्मविदा तु कार्य्या: ।
वाग्गुप्तिकार्य्याणि तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये ॥"
"हेम्नो भस्मकमभ्रकं द्विगुणितं लौहास्त्रय: पारदा-श्चत्वारो नियतन्तु वङ्गयुगलञ्चैकीकृतं मर्द्दयेत् । मुक्ता विद्रुमयो रसेन समता गोक्षुरवासेक्षुणा सर्व्वं वन्यकरीषकेण सुदृढ़ं गुप्तं पचेत् सप्तधा ॥" इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाधिकारे ॥) सङ्गतम् । इति शब्दरत्नावली ॥ वैश्यशूद्राणां पद्धतिविशेषे पुं । यथा, इत्युद्वाहतत्त्वम् ॥
"गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयो: ।"

गुप्तगति:, पुं, (गुप्ता संवृता अन्यैरलक्षिता गति-र्गमनं चेष्टादिर्वा यस्य ।) चर: । इति शब्द-रत्नावली ॥

गुप्तचर:, पुं, (गुप्त: योगेनात्मसंवृत: सन् स्वयं विष्णु-रपि सर्व्वैश्वर्य्यमाच्छाद्य नररूपेण चरतीत्यर्थ: ।) वलदेव: । इति त्रिकाण्डशेष: ॥ (कर्म्मधारय-समासे तु राज्ञां गूढ़चर: । गुप्तश्चरो यस्य इति विग्रहे राजानमेव बोधयति ॥)

गुप्तस्नेह:, पुं, (गुप्त: गूढ़भावेन स्थित: स्नेह: तैलादिरसो यत्र ।) अङ्कोठवृक्ष: । इति राज-निर्घण्ट: ॥

गुप्ता, स्त्री, (गुप्त + टाप् ।) कपिकच्छु: । इति राजनिर्घण्ट: ॥ परकीयान्तर्गतनायिकाभेद: । तस्या लक्षणम् । मैथुनगोपनम् । सा च त्रिधा । वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वृत्तवर्त्तिष्यमाणसुरतगोपना ३ । इति रसमञ्जरी ॥

गुप्ति:, स्त्री, (गुप् + अधिकरणभावकरणादिषु यथायथं क्तिन् ।) अवकरस्थानम् । कारा-गारम् । (यथा, माघे । ११ । ६० ।
"चिरमतिरसलौल्याद्बन्धनं लम्भितानां
पुनरयमुदयाय प्राप्य धाम स्वमेव ।
दलितदलकपाट: षट्पदानां सरोजे
सरभस इव गुप्तिस्फोटमर्क: करोति ॥")
रक्षणम् । इति मेदिनी । ते । १६ ॥ (यथा, मनु: । १ । ९४ ।
"तं हि स्वयम्भु: स्वादास्यात्तपस्तप्त्वादितोऽसृजत् ।
हव्यकव्याभिवाह्याय सर्व्वस्यास्य च गुप्तये ॥")
भूगर्त्त: । यम: । इति हेमचन्द्र: ॥ गर्त्तार्थे क्षिते-रुत्खननम् । नौकाच्छिद्रम् । इत्यमरटीकायां भरत: । गोपनम् । इति तट्टीकासारसुन्दरी ॥ (यथा, साहित्यदर्पणे । ३ । १५५ ।
"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ॥"
सम्बरणम् । यथा, कुमारे । ६ । ३८ ।
"वृहन्मणिशिलासालं गुप्तावपि मनोहरम् ॥"
ग्रहणीयमन्त्रसंस्कारविशेष: । यथा, तन्त्रसार-धृतगौतमीये ।
"यजनं जीवनं पश्चात् ताड़नं बोधनं तथा ।
तथाभिषेको विमलीकरणाप्यायने पुन: ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रिया: ॥")

गुफ, प श ग्रन्थे । इति कविकल्पद्रुम: ॥ (तुदां-परं-सकं-सेट् ।) पञ्चमस्वरी । प श, गुम्फति मालां मालिक: । जुगोफ । इति दुर्गादास: ॥

गुफित:, त्रि, (गुफ् + कर्म्मणि क्त: ।) गुम्फित: । ग्रथित: । इत्यमरटीका ॥

गुम्फ:, पुं, (गुम्फ + घञ् ।) ग्रन्थनम् । (यथा, रावणकृतशिवताण्डवे । १३ ।
"निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरम् ॥"
तथा च आर्य्यासप्तशत्याम् । ६०६ ।
"सततमरुणितमुखे सखि ! निगिरन्ती गिरां
गुम्फम् ॥")
वाहोरलङ्कार: । इति मेदिनी । फे । २ । श्मश्रु । इति शब्दरत्नावली ॥ गोँप इति भाषा ॥

गुम्फित:, त्रि, (गुम्फ + कर्म्मणि क्त: ।) ग्रथित: । इत्यमरटीकायां रायमुकुट: ॥ (यदुक्तम् ।
"प्रयत्नगुम्फितामाला यतस्तेन निराकृता ॥")